International Journal of Applied Research 2020; 6(9): 115-118




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2020; 6(9): 115-118
www.allresearchjournal.com
Received: 13-07-2020
Accepted: 23-08-2020

**डॉ. प्रिति पारेश्वरि महान्ति**
सहाचार्यः, धर्मशास्त्रविभागः, राजकीय संस्कृत महाविद्यालय, भागलपुर, बिहार, भारत

**Correspondence**
**डॉ. प्रिति पारेश्वरि महान्ति**
सहाचार्यः, धर्मशास्त्रविभागः, राजकीय संस्कृत महाविद्यालय, भागलपुर, बिहार, भारत

# संस्काराणां सामाजिकोपयोगिता

**डॉ. प्रिति पारेश्वरि महान्ति**

**सारांशः-** समाजस्य सुरक्षार्थं संस्कार एव मुख्य साधनं येन संस्कृतो मानवः समाजं सेवितुं शक्नुयात्। अतो यावत्पर्यन्तं सामाजिकानां मनः संस्कृतं न भवेत्, तावत्पर्यन्तं समाजे शृङ्खला, अनुशासनं च सम्यक् न प्रचलेत्। अस्मात् संस्काराः सामाजिकताया प्रतिकभूताः साधनरूपाश्च भवन्ति। तेषां समेषां संस्काराणां समाजे उपयोग आसीत्,अस्ति स्थास्यति च। तदर्थं मया संस्काराणां सामाजिकोपयोगिताविषये शोधलेखोऽयं प्रस्तुतः।

**कूट शब्दः** समाजस्य सुरक्षार्थं, संस्काराणां, समाजं सेवितुं

**प्रस्तावना**

समुपसर्गात् कृधातोः घञि प्रत्यये भूषणार्थे सुडागमे च कृते संस्कारशब्दो निष्पद्यते । स च संस्कारशब्दो विभिन्नेषु भारतीयशास्त्रेषु विभिन्नार्थको दृश्यते यथा - यज्ञाङ्गपुरोडाशेषु प्रोक्षणादिजन्यद्रव्यधर्मत्वेन मीमांसकाः, स्नानाचमनादिजन्यजीवधर्मत्वेन वेदान्तिनः, भावस्य व्यक्तीकरणाय आत्मव्यञ्जनशक्तिरेव संस्कार इति नैयायिकाः स्वीकुर्वन्ति । अतस्तेषां मते संस्कारो गुण एव । शिक्षा-प्रशिक्षण-संस्कृति-संस्करण-परिष्करण-भूषण-स्मरणशक्ति शुद्धिक्रियादिरूपत्वेन च साहित्यिकाः संस्कारशब्दं सम्यक् व्यवहरन्तो दृश्यन्ते । धर्मशास्त्रेषु मानवस्य कायिक-मानसिक-वाचिकपरिशुद्ध्यर्थमात्मनि जायमानो धर्मविशेषः संस्कार इति प्रतिपादितम् । अत एव मित्रमिश्रेण प्रत्यपादि यत् - आत्मशरीरान्यतरनिष्ठ- विहितक्रियाजन्याऽतिशयविशेषः संस्कार इति । स च ब्राह्मदैवभेदेन द्विविधः । गर्भाधानादिसंस्काराः ब्राह्माः, पाकयज्ञादिसंस्कारा दैवा इति ।

संस्कारशब्दस्य अंग्रेजीभाषायां सेक्रामेण्ट इत्यर्थो बाहुल्येन व्यवह्रियते । धार्मिकविधिविधानमेव तस्य शब्दस्यार्थः। अनेनैव प्रकारेण बहुधार्मिकक्षेत्रे प्रयुक्तः व्याप्तश्चायं शब्दः संस्कृतसाहित्ये शुद्धिप्रायश्चित-व्रतादिष्वन्तर्भवति ।

मनुमतानुसारेण गर्भाधानादारभ्यान्त्येष्टिं यावत् त्रयोदशसंस्काराः सन्ति । ते यथा - गर्भाधानं,पुंसवनं सीमन्तोन्नयनं, जातकर्म, नामकरणं, बहिर्निष्क्रमणं, अन्नप्राशनं, चूडाकर्म, उपनयनं, केशान्तः, समावर्तनं, विवाहः, अन्त्येष्टिश्चेति । याज्ञवल्केन केशान्तसंस्कारं विहायान्ते सर्वे मनुक्ताः संस्काराः स्वीकृताः । तेन प्रायशः केशान्तस्य समावर्त्तनेऽन्तर्भावः कृतः । एते सर्वेऽपि संस्काराः ब्रह्मण-क्षत्रिय-वैश्यानां द्विजातीनां समन्त्रका एवानुष्ठीयन्ते । शूद्रस्योपनयनसंस्काराभावात्तस्य एकजातित्वाच्च तदतिरिक्ता अन्ये सर्वे संस्कारा यथकालममन्त्रका एवोपदिष्टाः यथोक्तं याज्ञवल्केन -

> ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।
> निषेकाद्याः श्मशानान्तास्तेषां वे मन्त्रतः क्रिया ।। इति।

व्यासमतानुसारेण षोडशैव सन्ति संस्काराः । गर्भाधानादारभ्योपनयनान्ताः दशसंस्कारा ततश्च वेदारम्भः, केशान्तः, स्नानमुद्वाहः, विवाहाग्निपरिग्रहः, त्रेताग्निसंग्रहश्चेति षडिति मिलित्वा षोडश ।अङ्गिरसा पञ्चविंशतिसंस्काराः, गौतमेन सर्वाधिकाः चत्वारिंशत्संस्काराः अष्टौ आत्मगुणाश्च प्रतिपादिताः । ते यथा - गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, चत्वारि वेदव्रतानि, स्नानम्, सहधर्मचारिणीसंयोगः, पञ्चमहायज्ञाः (ब्रह्मयज्ञः, देवयज्ञः, पितृयज्ञः, अतिथियज्ञः, भूतयज्ञश्चेति), सप्त पाकयज्ञाः (अष्टका, पार्वणं, श्राद्धं, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजी चेति), सप्त हर्वियज्ञसंस्थाः (अग्न्याधेयं, अग्निहोत्रं, दर्शपौर्णमासः, चातुर्मास्यं, आग्रयणेष्टिः, निरूढपशुबन्धः, सौत्रामणिश्चेति), सप्तसोमसंस्थाः (अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामश्चेति),

अष्टौ आत्मगुणाः (दया, सर्वभूतेषु क्षान्तिः, अनसूया, शौचम्, अनायासः, मङ्गलम्, अकार्पण्यम्, अस्पृहा चेति)। एतेषु संस्कारेषु मनूक्तानां त्रयोदशसंस्काराणां कालः सामाजिकोपयोगश्च प्रबन्धस्यास्य प्रतिपाद्यविषयः।

**गर्भाधानम्** - 'निषेकादिश्मशानान्ता१' 'निषेकाद्याः२ श्मशानान्ताः' इत्यादिमनुयाज्ञवल्क्यादि- वचनानुसारेण गर्भाधानस्य संस्कारेषु प्राथम्यं बोध्यते। गर्भ आधीयते येन कर्मणा तत् गर्भाधानम् इति। तच्च ऋतावेव भवति 'गर्भाधानं ऋतौ इति याज्ञवल्क्यवचनात्३ इयर्ति गर्भधारणं गच्छति इति ऋतुः। तस्य कालः षोडश रात्रयो भवन्ति। उक्तं याज्ञवल्क्येन४ -

षोडशर्त्तुः निशाः स्त्रीणां तस्मिन् युग्मासु संविशेन्।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत्॥ इति।

अत्र निशाशब्दप्रयोगात् गर्भाधानाय दिवसे स्त्रीगमनं न केवलं निषिद्ध्यते अपि तु प्रत्यवायोऽपि श्रूयते। यथोक्तं ५प्रश्नोपनिषदि प्राणा वा एते स्कन्दन्ति ये दिवा रत्या सयुज्यन्ते इति। तास्वपि निशासु पुत्रार्थी युग्मासु कन्यार्थी चायुग्मासु संविशेत् इति व्यवस्ता विद्यते। एवं यो यथा कामयेत् स तथा प्रजाः प्राप्नुयात्। तत् च ऋतुकालगमनं नियमेन विधीयतेऽगमनेन प्रत्यवायश्रवणात्। उक्तं वीरमित्रोदये६ मित्रमिश्रेण –

ऋतुस्नानं तु यो भार्यां सन्निधौ नोपगच्छति।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ इति।

एवं ऋतुकाले यथाविधि स्त्रियं गत्वा गर्भ आहिते सति ततः प्रभृति आप्रसवात् रजोदर्शनाभावाद् ऋतौ स्त्रीगमनस्य निषेधे प्राप्तेऽपि -

यथाकामी भवेद् वापि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्षा यतः स्मृता॥ इति।

याज्ञवल्क्यवचनात्७ तत् प्रतिप्रसवो दृश्यते। यतो हि स्त्रीणां कृते इन्द्रेण वरो दत्तः यथा भवन्तीनां कामविहन्ता पातकी स्यादिति। अतोऽनृतावपि भार्य्यायामिच्छन्त्यां सत्यां गमनं कार्यमेव। अन्यथा पातकित्वश्रवणात्। अपि च स्वदारनिरतश्चैवेति वचनात् परदारगमनं सर्वथा निषिध्यते। अत एतेषां नियमानां पालनेन स्त्रियो न व्यभिचारं कुर्वन्ति न वा पुरुषाः। तेन समाजः सुशृङ्खलितो भवति जारजसन्तानोत्पत्तेः सम्भावनापि न भवति।

**पुंसवनम्** - पुमान् सूयतेऽनेनेति पुंसवनम्। येन संस्कारेण पुत्रोत्पत्तिरवश्यमेव भवति स एव पुंसवनमित्युच्यते। प्राक्काले समाजे पुत्राकांक्षा कन्याकांक्षापेक्षया च अधिकाऽऽसीत्। '८पुत्रेण लोकान् जयति' 'पौत्रेणानन्त्यमश्नुते' इत्यादि मनुवचनात् पुत्रस्य प्रसंसाऽपि शास्त्रे श्रूयते। अतो गर्भचलनात् प्राक् पुंसवनसंस्कारः क्रियते। गर्भाधानमृतौ९ पुंसः सवनं स्पन्दनात् पुरा इति योगीश्वरवचनात्। पुंस्त्वलक्षणानामाविर्भावात् प्राग्गर्भस्थशिशोः लिङ्गपरिवर्त्तनं कर्तुं शक्यते इति स्पष्टमुक्तमायुर्वेदे। अतः तस्मिन्नवसरे गर्भरक्षणार्थं पुत्रोत्पत्तये चायुर्वेदोक्तौषधीनामापि प्रयोगः क्रियते। संस्कारोऽयं गर्भचलनात् प्राक् तृतीये चतुर्थे मासि वानुष्ठीयते। केषांचित् मतानुसारेणायं संस्कारः एकवारं कर्त्तव्यो न प्रति गर्भम्। आश्वलायनगृह्यसूत्रे१० पुंसवनविधिरित्थं दृश्यते यत् - गर्भधानात् तृतीये मासि कस्मिंश्चित् पुनर्वसुनक्षत्रे पत्नी उपोष्य स्वकरतले गण्डुषमात्रं दधि संस्थाप्य तन्मध्ये शिम्बिकावीजद्वयं तदन्तरा चैकं यवं संस्थाप्य पिबेत्। तदा यदा पतिः पृच्छति किं पिबसि इति पत्नी च पुंसवनमिति उत्तरं दद्यात्। एवं त्रिवारं दधि पिबेत्। अस्य संस्कारस्य कर्त्ता स्वयं पतिरेव।

**सीमन्तोन्नयनम्** - अयं संस्कारः गर्भाधानात् षष्ठेऽष्टमे वा मासि क्रियते षष्ठेऽष्टमे वा सीमन्त इति याज्ञवल्क्यवचनात्११। अस्मिन् संस्कारे पतिः गर्भिण्याः पत्न्याः सीमन्तस्य अर्थात् केशपाशस्योन्नयनं करोति अर्थात् केशपाशमलंकुर्वन् तस्मिन् सीमन्तं रचयति। यतो हि गर्भस्तेन सुस्थितो भवति। उक्तमाश्वलायनाचार्येण - गर्भिण्या गर्भमत्तुं काश्चित् राक्षस्यो रुधिराशनाः समायान्ति। तासां निरसनाय गर्भिणीपतिः सीमन्तकरणीं श्रियमावाहयेत्। सीमन्तोन्नयनेन सीमन्तश्रितायाः श्रिया आविर्भावेन अलक्ष्म्यः क्रूरा राक्षस्यः पीडिताः पलायन्ते येन गर्भः सुस्थितो भवति।संस्कारस्य अस्यापरमपि प्रयोजनं यद् गर्भिण्याः केशप्रसाधनेन गर्भभारक्लान्ता पत्नी प्रमोदिता भवति। तेन गर्भस्थस्य शिशोर्विकासः पुष्टिश्च सुतरां जायते। पुनश्च यदा पतिः सीमन्तं रचयति तदा अयमूर्जस्वितां१२ वृक्षः उर्जेव फलिनी भवेति मन्त्रेण पतिरेकामुदुम्बरीशाखां तेन केशपाशेन सह वध्नाति। कृत्यमिदं पत्न्याः फलवत्तायाः प्रतीकमिव प्रतिभाति। वैदिकयुगे सीमन्तोन्नयनावसरे वीणागायका वीणावाद्यपूर्वकं सोमराजस्य स्तुतिमकुर्वन्निति भारतीयसांस्कृतिकनिधा१३ प्रतिपादितम्।

**जातकर्म** - गर्भकोशात् शिशौ जाते जातकर्म विधीयते। पुत्रमुखदर्शनेन पिता तस्य नाभिवर्द्धनात् प्राक् हिरण्येन चमसेन मधुसर्पिषां प्राशनं मन्त्रवत् कुर्यात्। प्रसङ्गेऽस्मिनुक्तं मनुना१४ यत् –

प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते।
मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम्॥ इति।

यद्यपि वैश्वानरं द्वादशकपालं निर्वपेत पुत्रे जाते इति वेदोक्तो नियमो विद्यतेः, तथापि जातप्राणवियोगभयात् अशौचान्ते तत् कर्म कर्त्तव्यम्। जातपुत्रं दृष्ट्वा पितर आनन्दी भवन्ति इति हेतोः जातकर्मणि पितृनुद्दिश्य १५नान्दीमुखी श्राद्धादिकमपि क्रियते। एतत् सर्वमच्छिन्ननाले कर्त्तव्यम्। यतो हि नाभिच्छेदनसमनन्तरमेवाशौचं भवति न ततः पूर्वम्। एवं कुमारे जाते महोत्सवं कुर्वन्ति जनाः, यतो हि पुत्रोत्सवतुल्य उत्सवः नान्यो विद्यते। पुत्र एव पितुः नरकनिवर्तकः। पिण्डोदकदाता रिक्थग्राही चेति सामाजिकी धारणा।

**नामकरणम्** - नामकरणसंस्कारस्यातीव महत्वं विद्यते। यथा व्यवहारार्थं कस्यचिदेव वस्तुनो नामापेक्ष्यते तथैव मनुष्यस्य नामकरणस्यावश्यकतास्ति। उक्तं बृहदारण्यकोपनिषदि बृहस्पतिवचनत्वेन१६-
एवं च जन्मतो दशमे द्वादशे वा दिनेऽशौचापगते नाम कर्त्तव्यम्। उत्कले एकविंशतिदिवसे नामकरणं सम्प्रति क्रियते। एकं नाम गुह्यं क्रियते अपरं सर्वजनप्रकाशनीय भवति। चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तस्थं पुंसाम्, ईकारान्तामयुग्माक्षरं च स्त्रीणां नाम कर्त्तव्यम्। उक्तं मनुना१७ -

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तिमाशीर्वादाभिधानवत्॥ इति।

वर्णभेदेनापि नामकरणे भेदो दृश्यते यथा ब्राह्मणस्य नाम मङ्गलसूचकं क्षत्रियस्य बलान्वितं वैश्यस्य धनसंयुक्तं शूद्रस्य च जुगुपसितं स्यात्। पुनश्च ब्राह्मणस्य नाम्नोऽन्ते शर्मा, क्षत्रियस्य वर्मा, वैश्यस्य गुप्त, शूद्रस्य च दास इति उपमान संयुज्येते। यथोक्तं १८व्यासेन -

शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रियस्य तु।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥ इति।

एतच्च नाम देवानां महापुरुषाणां वा यथा स्यात् तथा देयमिति केचित् मन्यन्ते । तेन न केवलं तन्नामोच्चारणेन पुण्योदयो भवति, अपि तु तेषामादर्शेनाभ्यत्थानाय च प्रेरणाऽपि लभ्यते । नाम्न: प्राक् श्रीशब्दयोजनस्य परम्परापि वर्तते । देशविशेषे स्वनाम्ना सह वंशनाम, ग्रामनाम, पितृनाम-संबोधनस्यापि परम्परा विद्यते ।

**निष्क्रमणम्** - जन्मतश्चतुर्थे[१९] मासि शिशु: सूतिकागृहात् बहिरानीयते । प्रथमं मातुर्गर्भान्निष्क्रम्य प्रसूतिगृहं ततश्च निष्क्रम्य बहिरागत्य विश्वात्मकं व्यक्तित्वं संवर्द्धयितुं समाजे तत् तत् नाम्ना परिचीयते । निष्क्रमदिवसे सूर्यस्य दर्शनं रात्रौ च चन्द्रस्य दर्शनं शिशो: कार्यते । सूर्यस्तु सकलशक्तेराधारभूत: । अतस्तस्य दर्शनं कारयन् पिता गायति -

> तच्चक्षुर्देवहितं पुरस्तात् शुक्रमुच्चरत् ।
> पश्येम शरद: शतं जीवेम शरद: शतम् ।।
> शृणुयाम: शरद: शतं प्रववाम शरद: शतम् ।। इति ।

**अन्नप्राशनम्** - जन्मत: षष्ठे मासेऽन्नप्राशनं क्रियते । षष्ठेऽन्नप्राशनं मासीति मनुवचनात्[२०] सामान्यत: दधिमधूघृतमिश्रमन्नं शिशवेऽन्नप्राशनाय दीयते । तद् भोजनग्रासं पिता भूर्भुव: स्वरिति व्याहृत्युच्चारणं कुर्वन्नेव दद्यात् । अन्नस्य भोजनं न केवलं जीवनधारणाय अपि तु व्यक्तित्वस्य विकाशनाय कल्प्यते । तद्दिनादारभ्य शिशु: बहिष्ठं खाद्यं गृहणन् मातृस्तन्यपानात् निवृत्तो भवति । एवञ्च कर्म शुभे लग्ने शुभे योगे शुभे नक्षत्रे शुभे चन्द्रे च कार्य्यम् ।

**चूडाकर्म** - संस्कारोऽयं जन्मत: तृतीये पञ्चमे वाब्दे क्रियते मनुना[२१] प्रथमेऽब्देऽपि चूडाकर्म विहितम् । उक्तं यथा –

> चूडाकर्म द्विजातीनां सर्वेषामेव धर्मत: ।
> प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ।।

चूडाकरणे शिखाव्यवस्थाऽतीव महत्वपूर्णा । शिरस: शिखरे शिरासन्धीनां सम्मिलनं भवति । अस्य स्थानस्याधिपति: रोमवर्त्त: । तच्च मर्मस्थानमिति कथ्यते । तत्र केनाप स्वल्पेनापि प्रहारेण शीघ्रमेव मृत्युर्भवति । अत: तत्स्थाने शिखां बद्ध्वाा तस्य रक्षा क्रियते । प्रवरसंख्यानुसारेण चूडासंख्या कल्प्यते । शिरसो मध्ये वसिष्ठगोत्रीया एकां शिखां धारयन्ति । अत्रिकाश्यपा उभयत: एकैकां, भृगवो मुण्डा:, अङ्गिरसगोत्रजा: पञ्चशिखाश्च धारयन्ति । अनयैव व्यवस्थाया शिखिनं दृष्ट्वा हिन्दूरयं ब्राह्मणश्चायमिति ज्ञानं सामाजिकानां भवति । एतेन चूडाकरणसंस्कारस्य कियन्महत्वं तत् सम्यक्तया ज्ञातुं शक्यते सम्प्रत्याधुनिकै: शिखाधारणं न क्रियते इति महत: खेदस्य विषय: ।

**उपनयनम्** - वेदाध्ययनार्थं शिष्यस्य गुरोराचार्य्यस्य वा समीपे गमनमुपनयनमुच्यते । अत्र पितैव मुख्य: संस्कर्त्ता । अष्टवर्षं[२२] ब्राह्मणमुपनयीत तमध्यापयीतेति वचनानुसारेणोपनयनवेदाध्ययनयोरेककर्त्तृकत्वं बोध्यते । अत उपनयितैवाध्यापयिता नान्य: । यदि पिता वेदमध्यापयितुमसमर्थस्तर्हि स्वयं स्वपुत्रमाचार्य्यस्य समीपं नीत्वा तस्योपनयनाय प्रार्थयेत् । आचार्यस्तमुपनीय शिष्यत्वेन गृहीत्वा तमध्यापयति ।
जन्मना जायते शूद्र: संस्काराद् द्विज उच्यते इति वचनादुपनयनसंस्कारेणैव द्विजत्वमाप्यते । शूद्रस्य तदभावात्स एकजातिरित्युच्यते । ब्राह्मणादीनामुपनयानाख्ये कर्मणि पितृत्वेनाऽऽचार्य्यस्य मातृत्वेन च सावित्र्या: कल्पितत्वात् ताभ्यां यद्जन्म तत्तेषां द्वितीयं जन्म ब्रह्मजन्म चेति कथ्यते।

अनेन संस्कारेण संस्कृतस्य मानवस्य सामाजिकं जीवनमारभ्यते। वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यं, गर्भाष्टमे ब्राह्मणं, गर्भैकादशे क्षत्रियं गर्भद्वादशे च विशमुपनयेदित्यादिवचनेन द्विजातीनामुपनयनस्य विभिन्ना: काला उक्ता: विभिन्नायां कामनायां सत्यां विभिन्नवर्षेष्वपि संस्कारोऽयमुपदिष्ट: । यथोक्तं मनुना[२३] -

> ब्रह्मवर्चसकामस्य कार्य्या विप्रस्य पञ्चमे ।
> राज्ञो बलार्थिन: षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।। इति ।

उपनयनसंस्कारकालस्य परमावधिरपि शास्त्रकारैर्निर्द्धारित:। तद्यथा - आषोडशाद्[२४] ब्राह्मणस्य आद्वाविंशात् क्षत्रियस्य आचतुर्विंशाच्च वैश्यस्योपनयनं कर्त्तुं शक्यते । यथोक्तकालानन्तरं ब्राह्मणक्षत्रियवैश्या अनुपनीता व्रात्या इत्युच्यन्ते । ते समाजे सर्वस्माद् द्विजकर्मणो बहिष्कार्य्या भवन्ति । तदर्थं व्रात्यस्तोमनाम यज्ञानुष्ठानं विहितं येन ते प्रायश्चित्तं कृत्वा पुन: सामाजिका भवितुमर्हन्ति ।

**विवाह:** - सहधर्मचारिणीसंयोगो विवाह: । स्नातक: अविप्लुतब्रह्मचर्य: उत्तमलक्षणयुक्तामसगोत्राम् असपिण्डाम् अनन्यपूर्विकां कान्तां यवीयसीं स्त्रियमुद्वहेदिति याज्ञवल्क्यमतानुसारेण[२५] कन्याया या योग्यता प्रदर्शिता तादृशीं कन्यां गृहीत्वा गृहस्थो भवेत् । वरस्यापि कुलशीलाभिजात्यादिकं दृष्ट्वा कन्यादानं क्रियते । न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति भारतीयानां धारणा । तेन गृहिणीसनाथ एव गृहस्थ इत्युच्यते । विवाहस्य प्रयोजनत्रयं दृश्यते । धर्मार्थं पुत्रार्थं रत्यर्थञ्च भार्य्या गृह्यते । यागाद्यनुष्ठानार्थं पत्न्या आवश्यकता, पुत्रार्थे जायाया: (पुंनामनरकव्यावर्त्तनाय) सत्यामपि पत्न्यां सत्सु च पुत्रेषु कामतोऽधिक- स्त्रीलाभार्थमपि विवाह: क्रियते । भारतीयनारी एकवारमेकवराय प्रदीयते । विवाहनन्तरं परपुरुषचिन्तनमपि तस्या: पापाय कल्प्यते । संकल्पादारभ्य सप्तपदीकर्मान्तं विवाहक्रिया प्रचलति । तेनैव नियमेन सप्तपदीकर्मान्ते वरकन्ये सामाजिकबन्धनेन बद्धे भवत: । तत: प्रभृति उभयोरेकशरीरत्वम् एकधर्मत्वम् एकप्राणत्वञ्च कल्प्यते । अपत्नीको मानव: समाजे कस्मिन्नपि श्रौतस्मार्तकर्मणि योग्यो न भवति । अत: सर्वेषां वर्णानां कृते विवाहसंस्कारोऽनिर्वार्य्य एव । विवाह: एक: व्यक्तिगतसंस्कारो न भवति । अयं पारिवारिक: सामाजिको वा संस्कार इत्युच्यते । हिन्दुसमाजे पुरुष: सर्वावस्थायां नार्य्या: रक्षणं करोति ।
अयमेव विवाह: ब्राह्मदैवार्षप्राजापत्यगान्धर्वासुरराक्षसपैशाचभेदेनाष्टविध: । एतेषु प्रथमे चत्वारो धर्म्या: अपरे चत्वारश्चाधर्मा इति । ब्राह्मणश्चतुषु वर्णेषु, क्षत्रिय: त्रिषु, वैश्य:, द्वयो, शूद्रश्च शूद्रामेव कन्यांगृहणाति स्म । सवर्णा भार्या मुख्या कामत: प्रवृत्तानामानुलोम्येन कन्याग्रहणं कर्त्तुं शक्यते । परन्तु तेन वर्णसंकरा: जायन्ते येन कुलधर्मस्य लोपो भवति ।
विवाहसंस्कारेण बहुविधसामाजिकसमस्यानां समाधानेन सह यौनसमस्याया अपि नियन्त्रणं क्रियते इत्यत्र नास्ति संशय: । अनेन प्रकारेण संस्कारा: मानवजीवनस्य विकासार्थं समाजस्य कल्याणाय च परिकल्प्यते ।

**अन्त्येष्टि:** - मनुयाज्ञवल्क्यादिभिरन्त्येष्ट्या अपि मरणोत्तरसंस्कारत्वेन स्वीकार: कृत: । मृतं दाहादिना संस्कृत्य तदुद्देश्येन तिलोदकपिण्डदानानि क्रियन्ते अन्यथा तस्य प्रेतत्वं न गच्छेत् । बालानां सिद्धपुरुषाणां महात्मनाञ्च भूमौ निखननं क्रियते । परन्तु सामान्यत: शवस्य दाहसंस्कार: सर्वमान्यो भवति । ततश्च सपिण्डादय: अशौचं यथाविधि पालयन्त: प्रेतोद्देशेन श्राद्धादिकं कुर्वन्ति । सपिण्डीकरणेन प्रेतत्वविनाशेन सह पितृत्वप्राप्तिर्भवतीति शास्त्रेषूक्तम् ।
साग्निकनिरग्निकेभेदेन ब्राह्मणादिवर्णभेदेन बालवृद्धाद्यवस्थाभेदेन देशकालादिभेदेन चान्त्येष्टिसंस्कारो बहुधा दृश्यते । परन्तु सर्वत्र मृतस्य

शुद्धिहेतुत्वेन क्रियमाणत्वात् तस्य संस्कारत्वमेव । एवं समाजस्य सुरक्षार्थं संस्कार एव मुख्यं साधनं येन संस्कृतो मानव: समाजं सेवितुं शक्नुयात् । अतो यावत्पर्यन्तं सामाजिकानां मन: संस्कृतं न भवेत्, तावत् पर्यन्तं समाजे शृङ्खला, अनुशासनं च सम्यक् न प्रचलेत् । अस्मात् संस्कार: सामाजिकताया प्रतीकभूता: साधनरूपाश्च भवन्ति । एतावता संस्काराणां सामाजिकी भूमिका कीदृशी कियती चेति तत् सम्यगवगम्यते ।

**पादटिप्पणी**

१. म.स्मृ. २/१६
२. या.स्मृ.,आ - १०
३. या.स्मृ., आ - ११
४. या.स्मृ., आ - ७१
५. प्रश्नोपनिषत् - १/१६
६. वी.मि.सं.प्र., पृ. १५६
७. या.स्मृ., आ - ८१
८. म.स्मृ., ९/१६७
९. ९. या.स्मृ., आ - १११०. चरके शारीरस्तानप्रकरणे, ८/३/२५
१०. आ.गृ.सू., ११३/२/७
११. या.स्मृ., आ - ११
१२. पा.गृ.सू., १/१५/६
१३. भा.सांनि, पृ. १७
१४. म.स्मृ., २/२९
१५. अच्छिन्ननाहेकर्त्तव्यं श्राद्दं वै पुत्रजन्मनि (जाकालि:) - वी.मि.सं.प्र.पृ. १९२
१६. बृ. ३/२/१२
१७. म.स्मृ. २/३३
१८. वी.मि.सं.प्र., पृ. २५३
१९. चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् । म.स्मृ., २०/३५
२०. म.स्मृ., २/३४
२१. म.स्मृ., २/३५
२२. म.स्मृ., २/३४
२३. म.स्मृ., २/३५
२४. वी.मि.सं.प्र, पृ. ३१५
२५. या.स्मृ., आ – ५२

**सन्दर्भग्रन्थसूची**

१. मनुस्मृति: चौखम्बा संस्कृत संस्थान, वाराणसी, २००३
२. याज्ञवल्क्यस्मृति: नागप्रकाशन, दिल्ली, १९८५
३. आश्वलायनगृह्यसूत्रम् चौखम्बा संस्कृत सीरिज आफीस, वाराणसी, २००३
४. पारस्करगृह्यसूत्रम् चौखम्बाप्रकाशन, गोपालमन्दिरलेन्, वाराणसी, २००७
५. वीरमित्रोदये संस्कारप्रकाश: चौखम्बा संस्कृत सीरिज, वाराणसी, १९३५